# अज्ञातकर्तृक चतुर्विंशतिजिननमस्कार – काव्यो

– विजयशीलचन्द्रसूरि

मध्यकालना जैन मुनिओए काव्योना अने छंदोना केटकेटला प्रकारो पर सर्जन कर्यु छे ! जेम जेम हस्तप्रतिओ उकेलाती जाय छे, तेम तेम आ सर्जनो प्रकाशमां आवतां जाय छे. अहीं एक नानी परंतु जुदी ज भातनी संस्कृत रचना प्रस्तुत छे : चतुर्विंशतिजिननमस्कार.

"चोवीश तीर्थंकर" ए जैन परिभाषानो शब्दगुच्छ छे. जैन धर्म अनुसार, ऋषभदेवथी महावीर–वर्धमान स्वामी सुधीना चोवीश धर्मप्रवर्तक तीर्थंकरो थया छे; तेमनी स्तुतिनां आ काव्यो छे. २४ तीर्थंकरोनी स्तुति करतां संस्कृत काव्यो, स्तोत्रो तो असंख्य उपलब्ध छे : प्रकाशित तेम ज अप्रकाशित. पण अहीं प्रकाशित थतुं स्तोत्र तेना छंदने कारणे ध्यानपात्र बने तेवुं छे.

प्राकृत भाषाओमां ज मुख्यत्वे प्रयोजाता 'वस्तु' छंदमां (मात्रामेळ) संस्कृत पद्य भाग्ये ज रचाएलां जोवा मळे छे. जे मळे ते पण एकलदोकल ; एक सामटा जथ्थामां नहीं ज. मारी जाण मुजब (भूलचुक लेवीदेवी) आ छंदमां, एकी साथे, २४ पद्यो, एक सळंग रचनारूपे मळ्यां ते विरल गणाय तेम छे.

आ स्तोत्रना कर्ता अने तेनो रचना–समय प्राप्त नथी थता, परंतु छंदनी प्रयोगरीति उपरथी ते १७मा शतकनी अने कोई विद्वान् जैन मुनिनी रचना होवानुं अनुमान थाय छे.

आ स्तोत्रनी मुख्य विशेषता, तेमां प्रयोजवामां आवेलो यमक अलंकार छे. शृंखलायमक चोवीशेय पद्योमां अखंड जोई शकाय. प्रथम पद्यनो छेल्लो शब्द ते ज पछीना पद्यनो प्रथम शब्द होय ते शृंखलायमक. अने वधुमां दरेक पद्यनी २–३–४–५ पंक्तिओमां पण आ ज शृंखलायमक जळवायो छे : दरेक पंक्तिनो अंतिम शब्दांश ते पछीनी पंक्तिनो प्रथम अंश बने छे. आ अतिकठिन लागती योजना पण कवि एकदम अनायास–सहजतापूर्वक अने काव्यनी मधुरता तथा प्रासादिकतानी मावजत करवा साथे करी शक्या छे, ते अद्‌भुत लागे छे.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आ रचना धरावतां फुटकळ पत्रोनी बे जुदी जुदी नकलो मने मुनिश्री धुरंधरविजयजी तरफथी प्राप्त थई हती. बन्नेनी लखावट जोतां १७मा शतकनी होवानुं अनुमान थयेलुं. बन्ने पत्रोने साथे राखीने आ वाचना यथामति तैयार करी छे, अने जुदा पडता पाठोने नीचे टिप्पणी तरीके मूक्या छे.

## चतुर्विंशतिजिननमस्काराः ॥

**प्रथमजिनवर** प्रथमजिनवर ! निखिलनरनाथ-
संसेवितपदकमल ! कमलबन्धुबन्धुर ! महोदय ! ।
दययोद्धृतभीमभवरूपकूपगतलोकसमुदय ! ॥
दयमानश्रियमसुमता-ममलचरित्रपवित्र !
वित्रस्ताखिलदुरितजय ! जय निष्कारणमित्र ! ॥१॥

मित्रभासुर मित्रभासुर ! जय **श्रीअजित** !
विजया-जितशत्रुभव ! भुवनसूर ! दूरिततमोभर ! ।
भरताधिपनृपतिवरसगरपूज्य ! भवरजनिवासर ! ॥
[१]सरभसभासितभुवनतल-केवलविमलालोक !
लोकशिवंकरसकलदिग्-वलयविलासिश्लोक ! ॥२॥

श्लोकगद्य श्लोकगद्यप्रभृति-निरवद्य-
पदपद्धतिगेयगुण ! विगतवल्गदुपसर्गसङ्गम ! ।
गमदुर्गम ! विनयनयनिलय ! समयसरिदोघगिरिसम ! ॥
[२]समसंयमसमतादिगुण-गणमणिरोहण ! परम-
रमणीयागम ! जय सदा **श्रीसम्भव[३]जिन** ! वितम ! ॥३॥

**तमभिनन्दन** तमभिनन्दन-देवमन्[४]दरा-
मन्दारमालामिलितमौलिमौलिसुरराजसेवित ! ।
विततोज्ज्वलकीर्तिभरभरितभुवन ! मुनिभिः प्रशंसित ! ॥
सितकरसुन्दरतरलतरचालितचामरराजि-
राजित ! रंजय येन जिन ! तव पदकमलमभाजि ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भाजितोत्तम भाजितोत्तम कनक **सुमतीश** !
पाथोदपथपांथ[५]पथिपव्य(च्य)मानपरमर्द्धिवैभव ! ।
[६]भवमार्गगतदीनभव्यजनतासुधाप्लव ! ॥
प्लवगचलाचलकरणजय ! योगीश्वर ! मुनिनाथ !
नाथवन्तमचिरेण[७] मां कुरु कुरु रमासनाथ ! ॥५॥

नाथनिर्मल नाथनिर्मल-पद्मसमचरण !
पद्मानन ! पद्मदलविपुलनयन ! वरपद्मलाञ्छित ! ।
छितपद्माभोगरस ! पद्मरागपत्रखमहोर्जित ! ॥
जित-पद्मासुत ! सुतनुरुचि-निचयनिराकृतपद्म ! ।
**पद्मप्रभजिन** ! समधिगत-शिवसम्पद्मयसद्म ! ॥६॥

सन्मनोरथ सन्मनोरथ-करणसुररत्न !
[८]रत्नोज्ज्वलफणमुकुट ! मुकुटरोचिरंजितदिगंतर ! ।
तरसाजितजगदजितमोहमल्लहेलाहतस्मर ! ॥
स्मरणपरायणजनजनित-वांछिततत(ति) ! नरदेव !
देव ! **सुपार्श्व** सुपार्श्व ! जय भुवनत्रयकृतसेव ! ॥७॥

सेवकोत्तम सेवकोत्तम-फलद ! निस्तन्द्र-
वरचन्द्रोज्ज्वलवर्ण ! वरचन्द्रसान्द्रनिःश्वाससौरभ ! ।
रभसाऽऽगतसकलशुभऋद्धिसिद्धिकुल[९]भुवनसंनिभ ! ॥
निभवंध्य ! प्रतिसन्ध्यमपि जगदञ्चित जिनचन्द्र !
[१०]**चन्द्रप्रभ** ! जय ! सातिशय-गुणगणरत्नसमुद्र ! ॥८॥

मुद्रसानत मुद्रसानत-निखिलनाकीन्द्र !
**सुविधीश्वर** ! सुविधिपथपान्थधौतकल्मषरजोमल ! ।
मलयोद्भवसुरभितमविमलशीलजनजनितपरिमल ! ॥
मलविमुक्तमुक्ताविशद-तनुकान्तिभिरभिराम !
**रामा**-सुग्रीवप्रभव ! जय कमलाकुलधाम ! ॥९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

धामधीरिम धामधीरिम रम्यभूपाल–
विपुलोज्ज्वलकुलकुमुदकौमुदीश ! जगदीश ! **शीतल** ! ।
तलपादस्पर्शवशसुपरिपूतभूतल ! महाबल ! ॥
बलशा[११]सनशंसितविशद–गुणसंततिसंवीत !
वीतकषाय ! शमायतन ! तव **विनमामि** प्रीत ! ॥१०॥

प्रीतये भव प्रीतये भव भुवनविख्यात–
महिमाऽहिम–हिमकिरण–हंसयान–हरि–हर–पुरन्दर–
दरदायकविषमसुमसायकस्य देव ! क्षयंकर ! ॥
करतललुलितसरोजवर ! जगतीजनि[१२]तश्रेय ! ।
**श्रेयःस्वामिन( न् )** ! भवदमन ! तनुरुचिजितगाङ्गेय ! ॥११॥

गेयसद्गुण गेयसद्गुण ! मघवमणिमुकुट–
कोटीतटघृष्टपदनखक्रमभूषितवसुन्धर ! ।
धरणीधव–धव[१३] धीर **जिनवासुपूज्य** वसुपूज्यसुतवर ! ॥
वरदीभूतपवित्रव[१४]पु–रपहस्तितसिन्दूर !
दूरनिवारितदुरित ! जय तीर्णभवाम्बुधिपूर ! ॥१२॥

पूरयाश्रित पूरयाश्रित–जनमनोभीष्ट–
मसमोदय ! चलनतललुलितसकलभुवनैकवैभव ! ।
भवभूधरभिदुरवर ! **विमल** ! भीमभावारिभैरव ! ॥
रवगम्भीरिममधुरिमा–ऽधःकृतजलदनिनाद ! ।
नादरतस्तव नमति कः स्फुटवाणीसंवाद ! ॥१३॥

वादनिर्जित वादनिर्जित देवनरवादि–
सम्पादितभक्तिभरविदितवस्तुविस्तार ज(जि)नवर ! ।
वरलावरवरगमन ! जनहितार्थकरणैकतत्पर ! ॥
परमपदप्रदपदकमल ! विस्तृतकीर्तिपराग ! ।
रागरोषजिद**नन्त** ! जय भुवि विश्रुतपरभाग ! ॥१४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भागधेय[युत] भागधेय[युत] ! प्रचुरसौभाग्य-[१५]
सम्भावितपदकमल ! वचनवीचिनीचैःकृतापर-
परमाहितकुमतमत ! **धर्मनाथ** ! निर्वृतिवधूवर ! ॥
वरणीभूतभुजावलय-लीनजगत्त्रयकान्ति-
कान्तिधाम ! सुखमतनु मे वितनु विमुद्रितशान्ति ॥१५॥

**शान्तिजिन** ! जय शान्तिजिन ! जय दोषभयभीत-
भुवनत्रयदुर्ग्गसमसमवसरणवरवप्रभासित ! ।
सितचामर-भेरिरव-भाःसमिद्ध-सिंहासनासित-
सितकर-धवलच्छत्र-वरनिःस्वन-विलसदशोक-
शोकहारिपुष्पप्रकरनन्दितविष्टपलोक ! ॥१६॥

लोकलोचन लोकलोचनचतुर ! चतुरन्त-
वसुधाधव ! धवलतमपरमकीर्त्तिसंभारसंगत ! ।
गतकल्मष ! विषमतमदावदाहजलवाह ! शाश्वत ! ॥
स्वलनुसमुज्ज्वलकान्तिभर-भर्च्छि(र्त्सि)तसुरगिरिराज ! ।
राजसहस्त्रनिषेव्य ! जय **कुन्थुनाथजिनराज** ! ॥१७॥

राजराजित[१६] राजराजित[१७] ! हारनीहार-
हरहासभासुर[१८] ! परमपद[१९]विलास ! भुवनैकबान्धव ! ।
धवलोज्ज्वलकीर्तिभर ! भरतभूमिभूषण ! गताश्रव ! ॥
**श्रवन्मुद**श्रुनतश्रमण-सिक्तक्रम[२०] ! संकल्प-
कल्पद्रुम ! **देवाऽर** ! जय जन[२१] चिन्तामणिकल्प ! ॥१८॥

कल्पनातिग कल्पनातिग ! कल्पितानल्पसंपद्-
जय **मल्लिजिन** ! मोहमल्ल ! मानैकभञ्जन ! ।
जनमिथ्याभावगदविलसदान्ध्यनाशनसुधाञ्जन ! ॥
जनन[२२]जरामृतिवल्लिवन[२३]-मोटनघनपवमान ! ।
मानवभवपावन ! मुनिप[२४] ! बोधितजनसन्तान ! ॥१९॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तानवानत[२५] तानवानत[२६]–कर्मसम्बन्ध !
वरकेवलमहिमभररभसनृत्यदमरेन्द्ररमणी– ।
रमणीयकहारगलदमलरत्नरोचिष्णुधरणी– ॥
धरणीधर ! गुरुगरिमवर ! **सुव्रत** ! भव्यानसम–
समवसृतिस्तव भगवता(तः) पायादपायादमम ! ॥२०॥

मम **नमीश्वर** ! मम नमीश्वर ! वितनुकुशलानि
कुशलावं लूनसमकर्मरूढ सुप्रौढकानन ! ।
जनतानामशिवकरमकरकेतुभयहेतुनाशन ! ॥
सनरामरपशुपरमसम ! जनतोल्लसदुपदेश[२७] ! ।
देशदूरसीमाशमितसडमरमरकक्लेश ! ॥२१॥

क्लेशकारण क्लेशकारणनिखिलयदुराज्य–
**राजीमति**संपदाभोगभोगमाभोग्य जिनवर ! ।
नवरसवशमनधिगत[२८] ! तं विहाय विधिधृततपोभर ! ॥
भरतावनिपावनसुगिरि**रैवत**मौलिनिविष्ट ! ।
विष्टपवन्दित ! **नेमिजिन** ! जय सौभाग्यविशिष्ट ! ॥२२॥

शिष्टनन्दित शिष्टनन्दित ! **कमठ**हठमुक्त–
जलवारणभुजगपतिधरणविहितविकटस्फु(स्फ)टाञ्चित–
चितरोचीरुचितरतरवपुरपास्तसतडिद्घनोर्जित ! ॥
जितमायामद ! **पार्श्वजिन** ! विघ्नगणानध्याय ! ।
ध्यायति यः तव नाम भुवि स भवति विगतापाय ! ॥२३॥

पायनायक पायनायक कायकलकान्ति–
संतर्जितकनक मम पंकमंकनिश्शंकहरिवर–
वरणोन्मुखनिखिलसुखहेतुमुक्तिवनिताप्रियंकर ! ॥
करपल्लवजितवरकमल ! विहृतिविबोधितविश्व ! ।
विश्वजनीन ! जिनेन्द्रवर ! **वर्धमान** ! विजयस्व ॥२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

य: स्वभावज य: स्वभावज–भक्तिभावेन
भवतो जिनराज ! नतिमभितनोति नन्[२९]नुकृतसमीहित ! ।
हितशासन ! [३०]सनरेन्द्रसुरकिंनरेन्द्रखेचरेन्द्रसेवित ! ॥
वितमा: स भवति भवतिरस्कारविशारद ! धीर ! ।
धीरमणीयवच:प्रचय ! सकलजगत्त्रयवीर ! ॥२५॥

**इति चतुर्विंशतिजिननमस्कारा: समाप्ता: ॥**

**पाठान्तर :-**

१. सरससभा० ॥ २. शम० ॥ ३. शम्भव० ॥ ४. ० वन्दारु ॥ ५. पांथपति० ॥ ६. भवमारवमार्गगत० ॥ ७. मा ॥ ८. रत्नोज्ज्वलमुकुटफण-विकटरोचिरोचितदिगन्तर ॥ ९. ०कुलवचनसंनिभ ॥ १०. चन्द्रप्रभजिन साति० ॥ ११. ०शासिन० ॥ १२. ०जननिश्रेय० ॥ १३. ०धव धर धीर० ॥ १४. ०पवित्रतनु० ॥ १५. प्रवर० ॥ १६.१७. ०राजत ॥ १८. हरभासुर ॥ १९. ०पदपदविलास ॥ २०. ०क्लम ॥ २१. जिन० ॥ २२. जन्म० ॥ २३. ०घन ॥ २४. सुमुनि ॥ २५.२६. तानवागत ॥ २७. जननो० ॥ २८. रसवससमधि० ॥ २९. नतकृत० ॥ ३०. सुनरसुर० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org